गङ्गाधरसत्यद्युतिः

४५५७

श्री॥ ...कामेष्वगायनमा...त्मार्थदर्शी निर्णीतमाचारमनुशिक्षितुं ॥ पद्धी-
लानामर...नर्मा ॥ १ ॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत् । कायक्लेशांश्च तन्मूलान्वेदतत्त्वा-
र्थमेव च ॥ ब्राह्मो मुहूर्तः संध्यादिर्द्विघटिकात्मकः । तन्मूलान्धर्मार्थहेतुकानि ... धर्मार्थ...
...वार्थं ...त्यपेके । कामं यद्धर्मार्थयोरपीडया चिंतयेत् । तल्लाघवे ... वि...पाधि...वि...मतीत
दक्षिणां नैर्ऋतीं वा दिशं गत्वा । ...रणे तथा काष्ठैः पत्रैर्वेणुदलेन वा । ...ये ...पि
अंतर्धाय वसुंधरां । तृणैः कुशादिव्यतिरिक्तैः । काष्ठैः पलाशादिव्यतिरिक्तैः । मूत्र...पुरीषयोरुत्-
सर्गं दिवा कुर्यादुदङ्मुखः । दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवा । इति मनुः । छायायाम-
न्धकारे वा रात्रावहनि वा द्विजः । कुर्यान्मूत्रपुरीषे च यथासुखमुखः कुर्यात्प्राणबाधाभयेषु
वा । निशम्य ...यतो वा ...संवीतांगो ...वर्तुहित इति मनुः । घ्राणास्यं वाससावेष्टय ...मूत्रं...
...समास्कन्दय दक्षिणबाहुपार्श्वे कमंडलुमाधाय मृत्पात्रीं । मृत्तिकापात्रीं । यज्ञोपवीतं दक्षिणक-
र्णे निधाय । म...नुः । न मार्गे पथि ...वीतेन भस्मनि न गोव्रजे । न फालकृष्टे न जले न चित्यां न च

पर्वते । नजीर्णदेवायतने नवल्मीके कदाचन । नससत्वेषु गर्तेषु । चितिरग्निर्यथयस्यानं स्थितावा । नन
दीतीरमासाद्य नच पर्वतमस्तके । यत्र पर्वतोऽत्राकस्तत्रमस्तकवर्जनार्थः । वापीकूपनदीगोष्ठचैत्य
०नः पथिभस्मसु । अग्नौ काम्यश्मशानेष्वन विण्मूत्रे समाचरेत् । वाप्यादिपदं उपनिषेधार्थं । का रहिते आम
काम्य प्रकृष्टस्थाने । नोषरे नशाद्वले नन पराङ्मुखो नोद्यानोदकसमीपयो नकिं दोष्ण्याकारेश
संहतदेशे । नवाय्वग्निविप्रा दित्यापोऽथवागास्त्वपश्यन्मूत्रपुरीषे कुर्यात् । मूत्रपुरीषे विधाय
लोष्ठेन भावेस्तृणकाष्ठेन यदलिंगं प्रमृज्जीत । गृहीतशिश्नः स्थोत्थाय वाप्यतः दिवोदङ्मुखो रा
त्रौ दक्षिणामुखः । ऊर्ध्वमृत्तिमात्रमृदायुदं प्रक्षाल्यत दर्धयाच्युनरत्तार्धया । एवं एका लिंगेतु
देतिस्त्रस्तत्रैवैककरे दश । उभयोः सप्त दतव्यामृदः शुद्धिमभीप्सता । मृत्तिकात्तु समादिष्टा विपद्मी
पूयितपया । स्तुदं विहाय । प्रतिपादं तिस्रः । एकैकावा । मूत्रोत्सर्गे दद्धः । एकालिंगेतु सव्ये त्रिपत्कूयामृद
यं स्मृतं । मूत्रवर्जितसः समुत्सर्गे शौचं तु मृत्तिकाद्वयावधिदक्षेनो र्ध्वकायं वामेनाधः कायं तो ।९।
गादेकभयी । गोमयेनमृदावाकमंडलुं परिलिप्य पूर्ववदुपस्पृश्य आदित्यं सोमममग्निं वावीक्षेत ।

क्षणान्वा । मनसा विष्णुं स्मरेत् । अथाचमनं । पश्चिमाभिमुखः पादौ प्रक्षाल्य आमणिबंध
नीयाच्चरणौ वाजानु । ऐशान्यभिमुखः शिखीं बध्वा पादौ समौ कृत्वा दक्षिणहस्तमन्तरे कृ
त्वा यज्ञोपवीती वाग्यतः हृदयस्पर्शास्त्रिरपः आचामेत् । आपोऽविकृताः शुद्धाः । संहत्याङ्गुष्ठमू
लेन द्विः प्रमृज्य आस्यतो मुखं । संहताभिस्तिसृभिः पूर्वमास्यमेव समुपस्पृशेत् । अंगुष्ठेन प्रदेशिन्या घ्राणं
पश्चादनंतरं । अंगुष्ठानामिकाभ्यां चक्षुः श्रोत्रे पुनः पुनः । कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै
। सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् । तर्जनीमध्यमानामाभिः अग्रेणास्यं चक्षुषः श्रोत्र
योः स्पर्शनं तु द्वयं तदभिप्रायेण पुनः पुनरिति वा । कर्णस्पर्शनं वा दक्षदेशे । सोपानत्को जलस्थो वा
मुक्तकेशोऽपि वा द्विजः । उष्णीषी वापि नाचामेत् वस्त्रेणाच्छाद्य वा शिरः । न गच्छन्न शयानश्च न चलन्न परा
न्स्पृशन् । न हसन्नैव संजल्पन्नात्मानं चैव वीक्षयन् । केशान्नीवीमधःकायमस्पृशन् धरणीमपि । यदि
स्पृशेत्त्वेतानि भूयः प्रक्षालयेत्करौ । आत्मानं हृदयं । कुर्यादाचमनं स्पर्शं गोपृष्ठस्य च दर्शनं । कुर्वी
तालंभनं वापि दक्षिणश्रवणस्य वा । वातकर्मणि निष्ठीवे दन्तश्लिष्टेऽनृते तथा पतितानां च संभाषे

उपवीती प्राङ्मुखस्तु उदङ्मुखो वा

दक्षिणे श्रवणे स्पृष्ट्वा तत् । अथ दंतधावनं । खदिरश्च करंजश्च कदंबश्च वटस्तथा । तिंतिणी वेणुपृ
ष्ठं वाम्रनिम्बौ तथैव च । अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा । तथा सर्वे कंटकिनः पुण्याः
क्षीरिणश्च यशस्विनः । आर्द्रं सत्वचं समपाटितमष्टांगुलमोष्ठग्रंथि विवर्जितं द्वादशांगुलं वितस्ति
मितं कनिष्ठांगुलीयाग्नि भिरदूषितं । चूर्णितायं मंत्रेणापरिजप्य भक्षयेत् । मंत्रः । आयुर्बलं यशो वर्चः प्र
2 जाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते । इति मंत्रेण कनिष्ठाग्रसमस्थौल्यं दं
तधावनं भक्षयेत् । नष्टेंदुषष्ठी प्रतिपन्नवमीश्राद्धव्रतादिषु अपि द्वादशगंडूषैरेव मुखशुद्धिः
अथ स्नानं । अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशान्तिलांश्च मन्त्रमाहृत्योदकांते
शुचौ देशे प्रतिष्ठाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्य मम्दु
हीतितोयमामंत्र्यावर्तयेद्येते शतमितिसृभिः त्रियानस्त्यपोंजलिनादाय ऊर्मिं त्रियाः इति द्वि
प्रतिलिंबिं लकरिंबस्त्रकुंधवरणो कर्मसृणास्ति अः प्रक्षाल्य स्नानमस्यादक्रमानभे ।२।
मानिमृदर्दिग्ध्युहितितिश्चयोभिमुखो मज्जेदपोत्र्यमानिलिस्नात्वोदिदाम्यङ्लनमव्यानिमि

ज्याऽनन्तस्यायम्य गोमयेनाविलिंपेत् मानस्तोक इति ततोऽभिषिंचेदिमं मे वरुण तत्त्वायामि
र्मापवहुत्वामेसुवंचवमक्षयन्तं तन्वैतन्निमज्योन्मज्याचम्य दर्भैः पावयेत् आपोहिष्ठेति तिसृभिः
दमापोहितिष्पतीर्देवीराप इति द्वाभ्यामपो देवा ऋपदादिवेत्यतो देवीरपां स समपाद्वीः ध्रु
वं तु मे ति नवभिस्त्रिपतिति मेत्यों कारेण व्याहृतिभिर्गायत्र्या दवैतन्त्रांतर्जले अघमर्षणं त्रिरावर्त्य
यद्भुपदं वा पूर्णोरिति वा त्रैवं प्राणायामो वा सशिरश्शुमिति वा विष्णोर्वा स्मरणं॥ यथोक्त
स्नानं कृत्वा गोमयं कुशान् कृष्णतिलान् सुरभिपुष्पाणि पादाय सुमनानघाहिके गत्वा नदीं
गत्वा पृथक् स्थापयेत् ततः पाणिपादं प्रक्षाल्य कुशहस्तो बद्धशिखो वामे ततः उरुं
हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ। अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयावि
धश्चित् नमो वरुणायाभिष्ठितो वरुणस्य पाशः इति तोयमामंत्र्य उपतिष्ठेत ये ते शतं वरुण ये स
हस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्काः स्वा
इति प्रदक्षिणं तोयमा[illegible] वर्तयेत् ततः सुमित्रिया न आप ओषधयः सन्तु इति जलांजलिमाद

ञ्चुमित्रियास्त्वास्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः। इति द्वेष्यं प्रति निषिञ्चेत्। ततः कटिवस्त्रं रु
जंघे चरणौ करौ प्रक्षाल्यैकं स्नातो याभ्यां त्रिस्त्रिः प्रक्षाल्य एकं पादं जले ऽपरं स्थले निधाय पाद्यामेत्। ततो
देवं नमस्कृत्य ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुरे। इति मृत्तिकया गा
त्रं सर्वं स्पृश्य नाभिमात्रं उदकं प्रविश्य। आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। वि
श्वं हि रिप्रं प्रवहन्तु देवीः। इति मन्त्रेण सूर्याभिमुखो निमज्जेत्। ततः स्नात्वा। उदिदाभ्यः शुचिरा
3 पूत एमि। इति निमज्ज्याचम्य। ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु
रीरिषः। मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे। इति मंत्रेण गोमयेनांगानि
विलिप्य। ततः ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके। ॐ तत्त्वा यामि ब्रह्मणा वं
दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः।
ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो ऽवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि ॥३॥
ॐ स त्वन्नो अग्ने ऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणं

रराणो वीहि मृडीकं सुहवो न एधि ॥ ॐ मापो मोषधीर्हिंसीर्धाम्नो धाम्नो राजंस्ततो वरुण नो मुंच। य-
दाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच ॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं
श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ॐ मुंचन्तु मा शपथ्यादथो वरुण्यादुत। अथो
यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥ ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥ इत्यष्टभिर्मन्त्रैर्हस्तेन प्रत्ये-
कं शिरसि जलं प्रक्षिपेत्। ततो वरुणदिशि जले प्रवाहाभिमुखः स्थिरः सूर्याभिमुखो वा मौनी शिखावान्निमज्जेत्।
ततश्चाचम्य ॐकारव्याहृतिगायत्रीभिरापो हि ष्ठेत्यादितिसृभिः। इदमापः प्रवहतावद्यं च मलं च यत्।
यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम्। आपो मा तस्मादेनसः पवमानश्च मुंचतु ॥ ॐ हविष्मतीरिमा आपो
हविष्मां आविवासति। हविष्मान्देवो अध्वरो हविष्मां अस्तु सूर्यः ॥ ॐ देवीरापो अपां नपाद्यो व ऊर्मिर्ह-
विष्य इन्द्रियावान्मदिन्तमः। तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा ॥ ॐ कार्षिरसि समुद्रस्य
त्वा क्षित्या उन्नयामि। समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ ॐ अपो देवा मधुमतीरगृभ्णन्नूर्ज-

स्वतीराजस्वष्टिनानाः।याभिर्मित्रावरुणावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरातीः॥द्रुपदादिवमुमुचानः
स्विन्नःस्नातोमलादिव।पूतंपवित्रेणेवाज्यमापःशुंधंतुमैनसः॥शंनोदेवीरभिष्टयआपोभवंतुपीतये
शंयोरभिस्रवंतुनः॥अपांरसमुद्वयसंसूर्येसंतंसमाहितं।अपांरसस्ययोरसस्तंवोगृह्णाम्युत्त
मं।आपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः।तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः।
पुनंतुमापितरःसोम्यासःपुनंतुमापितामहाःपुनंतुप्रपितामहाः॥पवित्रेणशतायुषा॥पुनंतुमा
पितामहाःपुनंतुप्रपितामहाः।पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै॥अग्नआयूंषिपवसआसुवो
र्जमिषंचनः।आरेबाधस्वदुच्छुना॥पुनंतुमादेवजनाःपुनंतुमनसाधियः।पुनंतुविश्वाभूतानिजात
वेदःपुनीहिमा॥पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत्।अग्नेक्रत्वाक्रतूँरनु॥यत्तेपवित्रमर्चिष्यग्नेवि
ततमंतरा।ब्रह्मतेनपुनन्तुमा।पवमानःसोअद्यनःपवित्रेणविचर्षणिः।यःपोतासपुनातुमा॥पुनंतुमा
देवस्यसवितःपवित्रेणसवेनच।मांपुनीहिविश्वतः॥वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्वोवी
तपृष्ठाः।तयामदंतःसधमाद्येषुवयंस्यामपतयोरयीणां॥चित्पतिर्मापुनातुवाक्पतिर्मापुनातुदेवो ॥१०॥
मासवितापुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः।तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुने

केयं। इति प्रत्येकं मंत्रैः पुनरोंकारव्याहृतिगायत्रीभिः कुशाग्रेण मार्जनं कुर्यात्। ततः पूर्ववत् इमंमेग
इत्यादिभिर्मंत्रैः शिरस्यंजलीं क्षिपेत्। ततो कृष्णादिकं वामनोऽघमर्षणं द्रुपदां वा आयंगौरिति वा
ऋचं त्रिरावर्त्तयेत्। वक्ष्यमाणमंत्रैस्त्रिरावर्त्तैः प्राणायाममेव कुर्यात्। ओंकारं वा त्रिरावर्त्तयेत्। विष्णुं वा
स्मरेत्। योगियाज्ञवल्क्यः। अप्स्वंतः पुनरावाममेतन्मंत्रवत् स्नानभोजने मंत्रमाह। द्रुपदां वा त्रिराव
र्त्तयेद्वाघमर्षणं गायत्रीं वा त्रिरावर्त्य महाव्याहृतिभिस्तथा। सोपि मुच्यत एवैनसः। चित्रा आपः पात
अघापहः। एतच्चाघमर्षणं निमज्जनानंतरं मार्जनात्प्राक्। आपस्तम्बः। आत्मानं त्रिरापस्नानेन
स्नात्वा। अथोपतिष्ठेदादित्यमित्यग्रेज्ञायते। अनेन मार्जनाभिधानात्। यदि स्नानापनेयमप्रायत्यं स्यात्तदा
कृतविधिः। अकृतमस्नानं कर्त्तव्यं। यदा ह्रदमीमेवावगाहेत यदा स्यादशुचिर्नरः। आपस्तम्बः स्यात्। नप
स्नानविधिवदाचरेत्। योगियाज्ञवल्क्यः। स्नात्वैवं वाससी धौते अक्लिष्टे परिधाय च। प्रक्षाल्योरू मृदा जि
क्षः हस्तौ प्रक्षाल्यैव तथा। अभावे धौतवस्त्रस्य शाणक्षौमाविकानि वा। कुतपं योगपट्टं वा द्विवासा येन
वै भवेत्। कुतपो नेपालकंबलः। जाबालिः। नार्द्रमेकं च वसनं परिदध्यात्कथंचन क्लेदसपर्शौ। स्मृते
रंजितेनोत्तरीयाविपर्यस्ते धौते। विष्णुः। स्नातः शिरो नावधुनुयान्नांगेभ्यस्तोयमुद्धरेत्। न तैलवस्त्रे

5

शेत । नग्नक्षाणितेष्वर्वं धृत्वा नासो बिभृयात् । नम्लेच्छान्त्यजपतितैः सहसंभाषणं कुर्यात् । संग्रहे पानं यस्ना
नेगात्राण्यंबरपाणिना । अंबरैः स्नानवस्त्रैः स्नानशाटीति विष्णुपुराणात् । अत्र शंखः । उदकस्याप्रदान
स्नानशाटीं न पीडयेत् । अथ संध्या । संवर्त्तः । प्रातः संध्यां सनक्षत्रामुपासीत यथाविधि । सादित्यां प
श्चिमां संध्यामर्धास्तमितभास्करां । आदित्यपद्मसहामयमाप्यपूर्णे बिंबपरं । पश्चाद्भिकालून हः । याज्ञ
वल्क्यः । जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् । संध्यां प्राक्प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् । अल्प
कृपश्चिमाभिमुखः । प्राक्पूर्वाभिमुखः । आसीनेति तिष्ठेदिति जपस्यास्यासीनत्वार्थं । तिष्ठेदित्यनेन जपे तदूर्ध्वता
यां । मध्याह्नसंध्याजपेप्यूर्ध्वतैव । मनुः । ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुवन् । प्रज्ञां यशश्च की
र्तिं च ब्रह्मवर्चसमेव च । दीर्घसंध्यत्वं प्रातरुदयावधिजपेन । सायं नक्षत्रावधिना । संध्योपसंध्यामुपा
सीत नास्तगे नोद्गते रवौ । याज्ञवल्क्यः । क्षपास्वष्टस्वसततं दिवसानां यथाक्रमं संध्यामुपक्रमेत् ब्रह्म
सद्बद्धो वसान्वकृता । वामे बद्धन् कुशान् दक्षिणे पाणौ पवित्रं कुशत्रयं बध्वा । सगणे च गायत्र्या शिखां
बध्वा ऐशान्याभिमुखः प्राणायामं वमो । ऋतमित्यभिमंत्र्य पुनरापो मामिति ततो वारिणाऽऽत्मानं वेष्टयित्वा सूर्य ॥५॥
णवगायत्र्या रक्षां कुर्यात् । ततः ॐकारस्य ब्रह्मा ऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारंभे वि

नियोगः॥ सप्तव्याहृतीनां प्रजापतिरृषिर्गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांस्यग्निवा
य्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्ते प्राणायामे च विनियोगः॥ गायत्र्या वि
श्वामित्र ऋषिर्गायत्री छंदः सविता देवता अग्निमुखमुपनयने प्राणायामे च विनियोगः॥ शिरसः प्र
जापतिरृषिस्त्रिपदा गायत्री छंदो ब्रह्माग्निवायुसूर्या देवताः प्राणायामे विनियोगः॥ इति ऋष्यादिकं
स्मृत्वा बद्धासनः संमीलितनयनो मौनी प्राणायामत्रयं कुर्यात्॥ तत्र वायोरादानकाले पूरकनामा
प्राणायामः॥ तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत्॥ धारणाकाले कुंभकः॥ तत्र कमलासनं रक्त
वर्णं चतुर्मुखं ब्रह्माणं हृदि ध्यायेत्॥ त्यागकाले रेचकः॥ तत्र श्वेतं ललाटे त्रिनेत्रं शिवं ध्या
येत्॥ त्रिष्वपि तेषु प्रत्येकं त्रिर्मंत्रावृत्तिः॥ प्रत्येकमोंकारादिसप्तव्याहृतयः॥ ॐकारादिसावित्रीं ॐ
कारद्वयमध्यगतां शिरश्चेति मंत्रः॥ तस्य स्वरूपं॥ ॐ भूः॥ ॐ भुवः॥ ॐ स्वः॥ ॐ महः॥ ॐ जनः॥ ॐ तपः॥ ॐ सत्यं॥ ॐ तत्
सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्व
रों॥ ततः सूर्यश्चमेति ब्रह्म ऋषिः सूर्यो देवता प्रकृतिश्छंदः अपामुपस्पर्शने विनियोगः॥ ॐ सूर्यश्च मा

मनसावाचाहस्ताभ्यां

मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्योरक्षंतां। यद्रात्र्यापापमकार्षं पद्भ्यामुदरेण शिश्ना रात्रिस्त
दवलुंपतु यत्किंचिद्दुरितंमयि। इदमहंमाममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा। इति प्रातराचामे
त्। आपः पुनंतु रिति विष्णुऋषिरनुष्टुप्छंदः आपो देवता अपामुपस्पर्शने विनियोगः। ॐ आपः पुनं
तु पृथिवीं पृथिवी पूता पुनातु मां। पुनंतु ब्रह्मणस्पति ब्रह्मपूता पुनातु मां। यदुच्छिष्टमभोज्यं यद्वा
दुश्चरितं मम। सर्वं पुनंतु मामापो असतां च प्रतिग्रहं स्वाहा। इति मध्याह्ने आचामेत्। अग्निश्च मेति
6 रुद्रऋषिरग्निर्देवता प्रकृतिश्छंदोऽपामुपस्पर्शे विनियोगः। ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्यु
कृतेभ्यः पापेभ्यो रक्षंतां। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तद
वलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा। इत्यनेन सायमाचा
मेत्। ततः आपो हिष्ठेत्यादि त्र्यृचस्य सिंधुद्वीप ऋषिः गायत्री छंदः आपो देवता मार्जने विनियोगः। ॐ आ
पो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाजयतेह नः। उ ।६।
शतीरिव मातरः। तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। ततोंकारेण जलमा

ततोराज्यशापत६

दायवारत्रयंद्रुपदांपठित्वातज्जलंशिरसिक्षिपेत्।अत्रसकृदिमिमैत्रैःशिरसि।अष्टमेनभूमौ।नवमेनपु
नःशिरसि।कुशाग्रयेणक्षिपेत्।द्रुपदादिवेतिकोकिलोराजपुत्रऋषिरनुष्टुप्छन्दःआपोदेवतासौत्राम
ण्यवभृथेविनियोगः।ॐद्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव।पूतंपवित्रेणेवाज्यमापःशुन्धन्तु
मैनसः।ततःकरस्थंजलंनासाग्रेयोजयित्वाआयतासुरनापतासुवात्रिःसकृद्वाघमर्षणंजपेत्।
अघमर्षणसूक्तस्याघमर्षणऋषिःअनुष्टुप्छन्दोभाववृत्तंदेवताअश्वमेधावभृथेविनियोगः।
ॐऋतंचसत्यंचाभीद्धात्तपसोऽध्यजायत।ततोरात्र्यजायत।ततःसमुद्रोअर्णवः।समुद्रादर्णवादधिसंवत्सरोअजाय
त।अहोरात्राणिविदधद्विश्वस्यमिषतोवशी।सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत्।दिवंच
पृथिवींचान्तरिक्षमथोस्वः।ततःॐअन्तश्चरसिभूतेषुगुहायांविश्वतोमुखः।त्वंयज्ञस्त्वंवषट्कारआपो
ज्योतीरसोऽमृतं।इत्यनेनाचामेत्।ततउत्थाय।ॐभूर्भुवःस्वरितिगायत्र्यात्रिरञ्जलिंसूर्यायाभिमु
खीक्षिपेत्।ततोभूम्यलग्नशुल्कफलतलभागोवाभूमिलग्नाघ्रेयकरणोवाभूलग्नैककरेणवाप्रातःसायंक
तोऽञ्जलिर्मेध्याम्नउर्ध्वबाहुःसूर्यमुपतिष्ठेत्।अनेनमन्त्रेः।तच्चक्षुरित्यस्यहिरण्यस्तूपऋषिर्गायत्रीछन्दःस

यदिवता सूर्योपस्थाने विनियोगः ॥ ॐ उद्वयं तमसस्परिस्वः पश्यंत उत्तरं देवं देवत्रा सूर्यमगन्म ज्यो
तिरुत्तममिति ॥ उदुत्यमिति प्रस्कण्व ऋषिः गायत्री छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ ॐ उदुत्यं जा
तवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यं ॥ चित्रमित्यस्य कौत्स ऋषिः त्रिष्टुप् छंदः सूर्यो देवता अग्नि
ष्टोमे सूर्योपस्थाने विनियोगः ॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आ
प्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः
दरातीत पुरउष्णिक् छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमु
च्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतं भूयश्च शर शतमदीनाः स्याम शरदः शतं
दः शतात् ॥ ॐ हृदयाय नमः ॐ भूः शिरसे स्वाहा ॐ भुवः शिखायै वषट् ॐ स्वः कवचाय हुं ॐ भूर्भुवः
नेत्राभ्यां वौषट् ॐ भूर्भुवः स्वः अस्त्राय फट् इत्यंगानि त्रिरावर्त्य पूर्वोक्तमर्घ्यादिकं कृत्वा पूर्वव
द्रूपं ध्यात्वा ॥ तेजोसीति देवा ऋषयः शुक्रं दैवतं गायत्री छंदः गायत्र्यावाहने विनियोगः ॥ ॐ तेजोसि ।७।
शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि इत्यावाह्य ॥ ॐ गायत्र्यसि

कपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मि
त्युपस्थाय।प्रातः प्राङ्मुखो मध्याह्ने सूर्याभिमुखश्चोत्थितः सायं पश्चिमाभिमुख उपविष्टः तत्र जपवि
धिना गायत्रीं जपेत् जप्यस्य रूपं।ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचो
दयात् ॐ।ततः प्रणिपत्य विसर्जयेत्।अथ जपविधिः तत्र शौचः कुशासनेष्वासीनः कुशोत्तरीयो
वा कुशपवित्रपाणिः उदङ्मुखः सूर्याभिमुखो वाक्षमालामादाय देवतां ध्यायन् जपं कुर्यात्।तत्र सु
वर्णमणिमुक्ताफलस्फटिकपद्माक्षेन्द्राक्षपुत्रंजीवकानामन्यतमामक्षमालां कुर्यात् कुशग्रन्थिं क
त्वा।हस्तोपयमेन वा गणयेत्।देवतां ध्यायन्निति देवताध्यानस्य जपाङ्गत्वविधानात्।यत्र न देव
ताविशेषविधिः तत्रापि मन्त्रप्रकाश्या देवता ध्येया।हस्तोपयामः श्रीशूलीनमते दशमाह याज्ञव
ल्क्यः।एकैकमक्षरं जप्येनाङ्गुष्ठेन तु वियुणीकृतां गवां गोष्ठे रात्रौ ग्रामस्य प्रान्ते रतामित्युक्तं।विविक्ते
देशे तीर्थेषु देवतायाश्च सन्निधौ पुरुषन्तं शतकोटिनाम्नन्ते शिवसन्निधौ।तथा।तिष्ठन्वा दीर्घम
र्गो वा जपं कुर्यात्समाहितः।अन्यथा प्राङ्मुखः कुर्याद्दक्षमालां क्रमेण तु।प्राक्कूलेषु कुशेष्वेवमा

सीनस्थासनेशुभेनात्युच्छ्रितेनातिनीचे दर्भपाणिः शुचिर्यतः दीर्घकालीनफलार्थं जपे भक्ष्यमाह
शाकयावकभैक्षाणि पयोमूलफलानि वा दधि सर्पिस्तथा ह्यापः प्रशस्तानि जपकर्मणि । सुत्तरोत्तरी व
रवास्युपवासस्य भैक्षं हीनक्रमया विते ॥ विराट्गीता २ २ ॥ जक हविष्यान्नानि यानि तु एतान्यन्यानि प्रशस्तान्याहु
शस्तानि जपकर्मणि । यद्ध्वनीयस्य सरितः स्पष्टशब्दवदक्षरैः । मंत्रमुच्चारयेद्वाच्यो जपयज्ञः स वाचिकः
८ शनैरुच्चारयेन्मंत्रमीषदोष्ठौ प्रचालयन् । किंचिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः । ध्यायायदक्ष
रश्रेण्या वर्णाद्वर्णं पदात्पदं । शब्दार्थचिंतनाभ्यासः स उक्तो मानसो जपः । न कंपयेच्छिरो ग्रीवां दंतान्न
वप्रकाशयेत् । न चंक्रमन्न हसन्न पार्श्वमवलोकयन् । नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा । न प
दा पादमाक्रम्य न चैव हि तथा करौ । न चासमाहितमना न च संश्रावयन् जपेत् । अथ प्रकृतं प्रष्टः । विप्र
शिपर्संकल्प ऊत्यनुवाकयुक्तपत्रकैर्भेरुलग्रासुरोरिल्युपस्थाय यज्ञप्रदक्षिणीकृत्य नमस्कृत्योपविश्योदङ्मुखो दर्भ
पाणिर्यथाशक्त्याद्यावारभ्य वेदांश्च अथ कात्यायनीपितर्पणप्रयोगः ॥ । ॐ ब्रह्मा तृप्यतां ॥ ॐ विष्णुस्तृ ॥ ॥ ५ ॥
प्यतां ॥ ॐ रुद्रस्तृप्यतां ॥ ॐ प्रजापतिस्तृप्यतां ॥ ॐ देवास्तृप्यंतां ॥ ॐ छंदांसि तृप्यंतां ॥ ॐ वेदास्तृप्यंतां ॥ ॐ ऋषय

वाग्वाचस्पतिर्विघ्नमङ्गोऽपीपतयेवरुणायनमः इति सर्वत्र सर्वकर्मसु इति मुखं विष्णोर्देवानांस्तुविद्ध
निविष्टक्रियेदेवस्नानविधिः। तच्छिगेः ब्रह्मादिप्रकाराकेश्वयेदिति ब्रह्मादीनि त्रिविशेषः। एषामपि
अङ्गुष्ठेरेव तथाप्ययोगियाज्ञवल्क्यः। अपो वा प्राणाय सर्वं तु देवं तु समाहितः। नमस्कारेण पुष्पाणि
विन्यसेत्तु पृथक् पृथक्। अथ पूजादिप्रकारः। ओं ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः। ओं ब्रह्मणे नमः। ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे
पदम्। समूढमस्य पांसुरे। ओं विष्णवे नमः। ओं नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः। ओं
रुद्राय नमः। ओं आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो या-
ति भुवनानि पश्यन्। ओं सवित्रे नमः। ओं मित्रस्य चर्षणीधृतो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम्। ओं मि-
त्राय नमः। ओं इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके। ओं वरुणाय नमः। इति ब्रह्मादीन्
सम्पूज्य। तत्तत्तोय ओं अदृश्रमस्य केतवो विरश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा। ओं हंसः शुचि-
षद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रि-

जाकृतं श्रुरुत्। इत्याभ्यीक्ष्य सुपस्थाय प्रदक्षिणीकृत्य ॐ आदित्याय नमः इत्यादिमंत्रैर्नमस्कृत्य। ॐ दिग्भ्यो
नमः दिग्देवताभ्यो नमः। ॐ ब्रह्मणे नमः ॐ अनन्ताय नमः। ॐ पृथिव्यै नमः ॐ ओषधीभ्यो नमः ॐ वाचे नमः
ॐ वाचस्पतये नमः। ॐ विष्णवे नमः। ॐ महद्भ्यो नमः। ॐ अद्भ्यो नमः। ॐ अपांपतये नमः। ॐ वरुणाय न
मः इति नमस्कृत्य। ॐ संवर्चसा पयसा संतनूभिरगन्महि मनसा संशिवेन। त्वष्टा सुदत्रो विदधातु
रायो नु मार्ष्टु तन्वो यद्विलिष्टं। इति जपन् सजलकरद्वयेन मुखं संस्पृश्य। ॐ देवा गातुविदो गातुं वित्वा
गातुमित। मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः। इति विसर्जयेत्। अथ योगियाज्ञवल्क्यः। उप
त्यादिध्यायम्यसोपानत्कोच्युतंस्मरन्। आगतः सोप्यावृत्त्यपत्नेन स्तुविरवस्त्रः तेनोदकेन द्वया
णि प्रोक्ष्य सम्यक् तर्पणं ह। ततः कर्माणि कुर्वीत नित्यं वैयानि कानि च। ध्यानानपः नाध्यावच्छेकदेशान्तु ध्या
यीमप आहरेत्। यद्यानीतं तु स्नात्वा प्रागुदक् दक्षिणेन तु। पश्चिमोत्तराणि आवस्य विधिवत् सम्यगाक्षिपेत्तप
समयतः अक्षताञ्जलिः सपुष्पाभिः सतिलाभिरणैर्वदनैः अर्घ्यपाद्यैः प्रयतो मन्त्रेण मातृकीर्तनैः न ११
मोस्तु विष्णुरूपाय नमस्ते ब्रह्मचारिणे। सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे। नमस्ते रुद्र वपुषे न

मस्तो भक्तवत्सल । पद्मनाभ नमस्तेस्तु कुण्डलांगदभूषण । नमस्ते सर्वलोकेश सुप्तानामपि बुध्यसे ।
सुकृतं दुःकृतं चैव सर्वं पश्यसि सर्वदा । सर्ववेद नमस्तेस्तु प्रसीद मम भास्कर । दिवाकर नमस्तेस्तु प्रभा
कर नमोस्तु ते । एवं रविं नमस्कृत्य त्रिः कृत्वा च प्रदक्षिणां । द्विजगोकाञ्चनं स्पृष्ट्वा ततो विष्णुगृहं विशे
श्राचायस्थैतु ततः ध्रुउपप्रतिमां वापि पूजयेत् । अर्घपाद्यैदानवैर्ग्रहैर्निवेद्य । अस्तंगमन्त्रात्तुष्टाः सूर्यो
न्तरेतया दर्शनात् । अथ देवपूजा । देवीपुराणे । शुचिर्वस्त्रधरः प्राज्ञो मौनी ध्यानपरायणः । गतकाम
यशोद्वेषरागमात्सर्यवर्जितः । आत्मानं पूजयित्वा तु सुगन्धिसितवाससा । सुप्रकृते यजेद्देवान् स्वकी
यास्मन् संस्थितान् । आहूय चार्घ्यपाद्यादि हेमपात्रेण दापयेत् । रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्वाकु
रोत्तिलैः सामान्यः सर्वदेवानामर्घोयं परिकीर्तितः । आभावे मानसं प्रोक्तं इति पूर्वकाद्दिकालप
रर्चितं कुंकुमीरक्तचन्दनमित्यर्थ । अन्दाताग्राम नैद्युतः सूर्यविष्णुशिवदुर्गाणां सामान्यतः पंचोपचा
रः । चंदनागुरुकर्पूरकुंकुमान्यनुलेपने । पुष्पाणि गिरिवनस्पतिवाटिकास्य भवानि सुगंधीनि वि
कसितानि । केशकीटरहितानि अपर्युषितानि स्वयमपतितानि अखंडानि । आर्द्राणि च प्राक्षितानि

पत्रान्यपीदृशानि निर्गंधीन्यपीति विशेषः। धूपे गुग्गुलुर्घृतमध्वाऽपराकेशाद्यः। कृष्णागुरुकर्पूरं
मंवा। घृतेन तैलेन दीपः। नैवेद्यं भक्ष्यं भोज्यं पक्वं मूलफलान्नपानकादीनि। फलं पक्वमदूषितं दु
ग्धविद्धं पक्वान्नैवेद्यं देवार्थमपसुघृत्य दातव्यम्। अथ निषेधः। अतःप्रभृति निर्माल्येन लंघय
मच्छीपते। नरसिंहस्य देवस्य तथान्येषां दिवौकसां। देवपुराणे। वस्त्रंयुलविहीनं तु न पात्रे कार
12 येत् क्वचित्। न क्वापि दिति स्नानादौ सर्वत्र निषेधः। बौधायनः। परिहितमधिकृत्मपद्माक्षितम्
वरणं मलिनं स्फुटितं मनुष्यसंगतं तत् देवतायै न संयुज्यात्। लघुहारीतः। स्नानं कृत्वा तु ये केचित्
पुष्पं गृह्णन्ति मानवाः। वै द्विजाः देवतास्तन्न गृह्णन्ति भस्मी भवति दारुवत्। दुर्गायां गणेशे च म
र्यविष्णौ शिवे तथा। करवीराणि पद्मानि वैपक्वानि वमल्लिकागणेशे दूर्वा च तुलसी विष्णौ राभोव
विद्ध्वर्कपूजनायुग्यशास्त्रानियान्यन्यानि समर्पयेत्। अथ विघ्नाः षोडशोपचारपूजा। सर्वेष्वाण।
नाचमनं देशकालौ स्मृत्वा। स्वदेहे न्यसेत्। प्रथमं विन्यसेद्वामे द्वितीयं दक्षिणे तथा। तृतीयं वाम १२
पादे च चतुर्थं दक्षिणे न्यसेत्। पंचमं वामजानुनि षष्ठं वै दक्षिणे न्यसेत्। सप्तमं वामपार्श्वे

अष्टमीं दक्षिणे न्यसेत् । नवमीं विन्यसेन्नाभौ दशमीं हृदये न्यसेत् । एकादशीं कंठदेशे द्वादशीं वाम
बाहुके । त्रयोदशीं दक्षिणे च वक्त्रे चैव चतुर्दशीं । नेत्रे पंचदशीं न्यस्य शिखायां षोडशीं न्यसेत् । यथा देहे
तथा देवे न्यासं कृत्वा विधानतः । आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमं । द्वितीययासनं दद्यात्पाद्यं
चैव तृतीयया । अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनीयकं । षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव
च । यज्ञोपवीतमष्टम्या नवम्या चानुलेपनं । पुष्पं दशम्या दातव्यमेकादश्या तु धूपकं । द्वादश्या दीपकं
दद्यात्त्रयोदश्या निवेदनं । चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षिणां । दक्षिणां तु यथाशक्त्या षोड
श्या तु प्रदापयेत् । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्वतस्पृत्वात्यतिष्ठद्द
शांगुलं ।१। पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ।२। एतावा
नस्य महिमातो ज्यायांश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।३। त्रिपादूर्ध्व उदैत्पुरु
षः पादोस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ।४। ततो विराडजायत विराजो अधि पू
रुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।५। तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं । पशूंस्तां

श्च ये । वायव्यानारण्याग्राम्याश्च ये ॥८॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छंदाꣳसि जज्ञि-
रे तस्माद्यजुस्तस्मादजायत ॥९॥ तस्मादश्वा अजायंत ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्मा-
ज्जाता अजावयः ॥१०॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजंत साध्या ऋषयश्च ये
॥११॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥ ॥ ब्रा-
ह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥११॥ चंद्रमा म-
नसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥ नाभ्या आसीदंत-
रिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१३॥ यत्पुरुषेण
हविषा देवा यज्ञमतन्वत । वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः । सप्तास्यासन्परिधयस्त्रिः
सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥ यज्ञेन यज्ञमयजंत देवास्ता-
नि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥१६॥ धनरता- २३
भिः स्तुतिः । ॐ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ।
तन्वामा

देवानां दानवानां वसामाध्यमधिप्वेति सर्वदा वरदाह्यं ईडजा मित्रामरणेतवाशीनी राष्यपत्रषोडि
लिंदद्यात्समापयेत् । एशान्यां विश्वरूपाय नमः इति निर्मोल्यदेयं । स्वयंमेशाग्नस्थादं दिवार स्थिति
धायरूपे भगवंतमाधायार्वां करंडेस्थापयेत् । पंचसूनागृहस्थस्य चुल्लीपेषण्युपस्करः
कंडनी चोदकुंभश्च बध्यते यास्तु वाहयन् । तासां क्रमेण सर्वासां निःकृत्यर्थं महर्षिभिः । पंचक्लृप्ता म
हायज्ञाः प्रत्यहं गृहमेधिनां । अध्यापनं ब्रह्मयज्ञः । पितृयज्ञस्तु तर्पणं । होमो दैवो बलिर्भौतो नृय
ज्ञोऽतिथिपूजनं । यानातपः । लौकिके वैदिके वापि कृतात्तु ज्जोचितो । वैश्वदेवं तु कुर्वीत पंचसू
नापनुत्तये । अंगिराः । शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः । यस्मिन्नग्नौ पचेदन्नं तस्मिन्हो
मो विधीयते । आर्यः प्रयत्नाद्वैश्वदेवान्नस्य स्वीकर्त्ता रः म्लेच्छकेनाभाषी कार्शीहत्वद्यामित्युमसुरणा
न्नं वर्जयेत् । केशान्गवाप्तश्चालभ्य तु परिहरेत् । आपस्तंबः । भोजनं हवनं दानमुपहारः प्रतिग्रहः
बहिर्जानु न कार्याणि तद्वदाचमनं स्मृतं । पुष्करे नैवयमदत्त्विंहु स्वादेषोऽभ्यजायत । अथ प्रयोगः । पर्यु
क्षितो समिद्धमो तदभावे जले तदभावे भस्मो पावकादयस्तु धान्य फल मूलादिना वा पंचाहुतीर्जुहुया ।

त। ॐ अग्नये स्वाहा। ॐ प्रजापतये स्वाहा। ॐ गृह्याभ्यः स्वाहा। ॐ कश्यपाय स्वाहा। ॐ अनुमतये स्वा
हा। ततो ऽन्तरशेषान्नेन बलिदानं। तत्र प्रत्येकं करेण बलिं दद्यान्मार्जयित्वा जलेनाभ्युक्ष्य। ॐ पर्जन्या
य नमः। ॐ अद्भ्यो नमः। ॐ पृथिव्यै नमः। इत्युदपात्रसमीपे त्रिधा। ॐ धात्रे नमः। ॐ विधात्रे नमः। इति द्वा
रपटः। ॐ वायवे नमः। इति प्रतिदिशं। ॐ प्राच्यै नमः। ॐ अवाच्यै नमः। ॐ प्रतीच्यै नमः। ॐ उदीच्यै नमः। इ
त्यपि प्रतिदिशं। ॐ ब्रह्मणे नमः। ॐ अन्तरीक्षाय नमः। ॐ सूर्याय नमः। इति गृहमध्ये। ॐ विश्वेभ्यो दे
वेभ्यो नमः। ॐ विश्वेभ्यो भूतेभ्यो नमः। ॐ उषसे नमः। ॐ भूतानां पतये नमः। इत्युत्तरोत्तरं। ततः प्राची
नावीती दक्षिणाभिमुखः पातितवामजानुः पितृतीर्थेन दक्षिणस्यां दिशि। ॐ पितृभ्यः स्वधा नमः
इति दद्यात्। ततो बलिशेषान्नं लिप्तपात्रं प्रक्षाल्य यक्ष्मैतत्ते निर्णेजनं नमः इति वायव्यां दिशि दद्यात्
। गृहवासादौ दानमप्येवं अग्नेः पश्चिमतश्चतुरस्रमण्डले धात्रादिबलिदाने। यक्ष्मबल्यनन्तरं
नहुमुषुराये। ततो व्यस्तेन मापायन्भूमिभागस्थेभ्यो जनैः दद्याच्छेषं भूतेभ्यः यान्वसमाहितः १४
देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः। प्रेताः पिशाचास्तरवस्तथान्ये ये चान्न

मिद्धंन्निमयाग्रदत्तं।पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनिबंधबद्धाः।प्रयांतुतेतृप्तिमि
दंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु।येषांनमातानपितानबंधुर्नैवान्नसिद्धिर्नतथान्नमस्ति।
तत्तृप्तयेन्नंभुविदत्तमेतत्प्रयांतुतृप्तिंमुदिताभवंतु।भूतानिसर्वाणितथान्नमेतदहंचविष्णुर्नयतो
न्यदस्ति।तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिभवायतेषां।चतुर्दशोभूतगणोयएषतत्रस्थि
ताये।खिलभूतसंघाः।तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेमुदिताभवंतु।इत्युच्चार्यनरोदद्याद
न्नंश्रद्धासमन्वितः।भुविभूतोपकारायगृहीसर्वाश्रयोयतः।श्वचांडालविहंगानांभुविदद्यात्ततोन
रः।मनुः।शुनांचपतितानांचश्वपचांपापरोगिणां।वायसानांकृमीणांचशनकैर्निःक्षिपेद्भुवि।व्या
सः।ऐंद्रवारुणवायव्यायाम्यावैनैरृतास्तथा।वायसाःप्रतिगृह्णंतुभूमौपिंडंमयार्पितं।श्वानौ
द्वौश्यामशबलौवैवस्वतकुलोद्भवौ।ताभ्यांपिंडंप्रयच्छामिस्यातामेतावहिंसकौ।इत्थाऽनेनविधा
नेनबलिंपश्चादुपस्पृशेत्।स्मृत्यर्थसारे।नित्येतावत्सवत्सामिश्राद्धेविवाहेनवर्जिति।लघुहारीतः।नित्य
श्राद्धमदेवंस्यात्।श्राद्धेपिंडविवर्जितं।अन्नप्रयादिनिवृत्तिःस्यामापरात्।अत्रप्रयोगः।उं।अद्यनित्यश्रा

क्रमं हेकरिष्यन्तिवाकीक्षचागा यच्चोदेवताभ्यइतिजपित्वा ॐ प्राकाद्यस्परणेनअग्नौद्रव्याणिनि
त्का ॐ अद्यामुकगोत्रपितरमुकशर्मन्निदमासनंतेस्वधेतिप्राचीनावीतीपातितवामजानुः पि
तृतीर्थेनजलेनतिलसमेतंदक्षिणाग्रकुशाग्रयोःपित्रेदद्यात् । एवमेवपितामहादिभ्यः । आसनंद
त्वाअपहताइतितिलान्विकीर्य । आयन्तुनइतिजपित्वा । ॐ अद्यामुकगोत्रेत्यादि [illegible] एता
निगंधपुष्पधूपदीपवस्त्राणि [illegible] यथालाभं [illegible] गंधादिदद्यात् । ततः अन्नंपरिवेष्य
मधुमधुवाता [illegible] पृथिवीतइत्यादिजपित्वाइदंविष्णुरित्यादिना [illegible] मन्नं
[illegible] अपहतेतितिलान्विकीर्य ॐ अद्यामुकगोत्रेत्यादि इदमन्नं [illegible] जलं [illegible]
[illegible] ततोयथाशक्तिपवित्राणिजपेत् । ततस्तदन्नंब्राह्मणायप्रतिपाद
येत् ब्राह्मणा [illegible] भिक्षादानं [illegible] ब्रह्मचारिणो
रूपं [illegible] मार्कण्डेयपुराणे । [illegible] भिक्षां [illegible] चतुष्टयी । अग्रं १५
[illegible] भोजनं [illegible] भिक्षा मथापिवा [illegible]

यथाविभवमात्मनः। हस्तदत्ताश्च या भिक्षा यज्जनं सलिलानि च। भुक्त्वा नरः स्वितीयाति दातारस्वर्गं
न गच्छति। ब्रह्मपुराणे। सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः। प्रतिगृह्णन्तु मे ग्रासं गावस्त्रै
लोक्यमातरः। दद्यादनेन मंत्रेण गवीयास्ते सदैव हि। पंचभूतेति। वैष्णवस्य पवित्रे स्वर्गसंभवे।
प्रतीच्छ मं मया दत्तं सौरभेयि नमोऽस्तु ते। ग्रासमुष्टिं परगवे स्नात्वा दद्याच्च यः सदा स्वधीत्वा स्वयं
माहारं स्वर्गलोकं स गच्छति। इति गवाह्निकं। अथातिथिपूजा। प्रियो वा यदि वा द्वेष्यो मूर्खः पं
डित एव वा। वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसंक्रमः। श्रीपतेस्स्वागतेनाग्निरासनेन शतक्रतुः। पि
तरः पादशौचेन भोजनेन प्रजापतिः। यमः। न पृच्छेज्जाश्च चरणे देशं नाम कुलं श्रुतं। स्वधानोभ्यागतं
विप्रं भोजनार्थमुपस्थितं। दिनातिथौ तु विमुखे गते यत्पातकं नृणां। तदेवाष्टगुणं पुंसां सूर्योढे वि
मुखे गते। सूर्योढः पथिकस्सायमुपगतः। अथ भोजनविधिः। तत्र बौधायनः। सुप्रक्षालितपाणि
पादोऽप आचम्य शुचौ संवृते देशेऽन्नमुपहृतमुपसंगृह्य कामक्रोधलोभमोहानपहृत्य सर्वा
भिरंगुलीभिः शब्दमकुर्वन् प्राश्नीयात्। नात्मानं बहिः। अस्थापात्रस्थाप्यग्नीतोऽविदिक्षु खामोनी

धानिपाश्वल्क्यः।प्राणोव्यानस्तथापानःसमानोदानएवच।ॐकार[illegible]स्वाहान्तैःपंचस्वाहाग्राजतीः।अंगुष्ठानामिका

पवित्रपाणिः प्राङ्मुखः प्राग्मुखः पादद्वयपाणिद्वयमुखानीति पंचार्द्रः चतुष्कोणं विधाय। मनुः। भुञ्जीयो

दशानं नित्यमद्याच्चैवान्तरासयन्। दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनंदेच्च सर्वदा। ब्रह्मपुराणे। वामेन पाणि

नापात्रं धृत्वा उग्रवस्त्रे स्थितं तेजो राशीति जपस्त्यन्नं प्रणाममन्मत्वेन्न ददतेत। विष्णुपुराणे। अपोशानं

गृहीत्वा सर्वतीर्थमियं यजेत्। अमृतोपस्तरणमसि स्वाहेति। नाम्नूषः। नन्दाद्यष्टम्यामोत्कृ

ष्टं नायसेन चकोपेन न कृज्ञादिभोजनं दुष्टेन भाव दूषितं। नाभिन्नभोजने वैद्यादिनिमित्तेन न

विपाणौ लवणं। न भार्यया सहाश्नीयात्। अत्र ध्वनिर्न दोषः। न कुत्सितानाम्यमनाऽभिभाषमा

णोऽश्नीयात्। न शिशुर्भृतनिर्भत्सयन्। नाग्रदायप्रेक्ष्यमाणेभ्यः। एकवस्त्रो न भुंजीत कपायम

पिधायव। न भक्ष्याणां संसर्गं भक्षयेत्। न वारात्रौ प्रेष्य कृतं। न स्वरो द्वामकृत्कोन भुंजानो नैव

शयन। न पादो न शिरो बहिर्निनपदं भाजनं स्पृशेत्। नाधिवृन्दयात्। न जातिश्रुत्वीयात्।

न कपस्त्री। भस्मनि भजलबारमार्गेः पीत्वाम्भदयेत। महाभारते। पानीयं पायसं सर्पि ॥१६॥

मधुसक्तुमयद्यापि। निरस्य शेषमेतेषां न प्रदेयं तु कस्यचित्। ब्रह्मपुराणे। तिलकल्कैर

16

धिष्ठीवजलंचैवोद्धृतानियमान्त्यजेदद्भिकुष्ठानिसहभुक्त्वाथकदाचन॥नग्रामेनोत्करासनः॥नबहु
नांश्चैस्समाप्रणोनौनैवाम्भसिबहिर्वस्त्रथा॥नन्यानंयथवह्निगृहेदेवागारेकथयेन॥शयानःप्रौढपाद
कृत्वाचयैवाघ्रसिक्थकौ॥पिबेन्नाञ्जलिनातोयं॥नभावदुष्टमश्नीयात्॥पस्तुपातितलेष्मकं
यक्ष्मपक्वाय्यंपुतंप्रसूतीस्त्रलिभिर्यश्चतस्यगोमांसवज्जयेत्॥नाडीपिभोजनंकुर्यात्स्त्रिय
नातिसुप्रक्तिनः॥हस्तस्यस्थया॥नोष्मप्रासाद॥पश्यानभक्षयेत्॥श्मशानाभ्यन्तरगतोदेवालयग
तोपिवा॥शयनस्थोनभुञ्जीतनपाणिस्थंनचासने॥नसंध्ययोस्तुमध्याह्नेनार्द्धरात्रेकदाच
न॥नार्द्रवासानार्द्रशिरानचायज्ञोपवीतवान्॥नप्रसारितपादस्तुपादारोपितपाणिमान्॥
नावसक्थिकस्थश्चनस्यपर्यङ्कस्थितः॥नवेष्टितशिराश्चापिनोत्सङ्गीकृतभाजनः॥
नैकवस्त्रोनदुष्टमध्योपानत्कःसपादुकः॥नचर्मोपरिसंविष्टश्चर्मवेष्टितपार्श्ववान्॥ग्रा
सस्यजन्मकालुष्यंदुःखंनक्षितंनकुत्सयेत्॥ग्रासशेषंनचाश्नीयात्पीतशेषंपिबेन्नतु॥शाकमू

लफलेलूल्लंपादैनच्छेदैर्न भक्षयेत् । सं॰ स्वयमुत्तानमन्नेन विचिंत्यं पात्रमं स्थितौ । बहूनां भुंजतां मध्ये
न चाश्नीयात्त्वरान्वितः । वृथा न विकिरेदन्नं नोच्छिष्टः कुत्रचिद्व्रजेत् । न स्पृशेत्स्वशिरो विप्रः स्वो
च्छिष्टेनैव पाणिना । नानिष्ठुरवादेन्नह्यमूहन्न जल्पन्न विलोकयन्न वसलतः । नोच्छिष्टो घृतमाद
द्यात्स्वयं द्राक्षतारकानि रीक्षेत् । न मूर्धानं स्पृशेद्वापि न ब्रह्म कीर्तयेत् । तथा न निःशेषकृत्स्यात्
नृत्यन्यत्र मधुसर्पिपयःशाक्तुल्लुपलतिलदनमथः । छिन्नत्यात्तेयमन्नं सौम्यं ष्ठेन्नयं सखशाद्दंकु
र्यान्नपाणिमवध्नुयात् । विष्णुपुराणे । अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं । लवणाम्लौ
तथा मध्ये कटुतिक्तादिकांस्ततः । प्राक् द्रवं पुरुषोऽश्नन्वै मध्ये च कठिनाशनः । अन्ते पुनर्द्रवाशी
च बलारोग्येन मुंचति । ब्रह्मपुराणे । कृत्वा तु दीरं तमाहार्यं नत्व पूर्वा त्वे व हि धिजचेद्दस्ये
धेम भैभर्गिजभेनम् । बाधाः शौचरणार्थायवस्तु थमवशेषयेत् । विद्यमाने न हस्तेन ग्रासं ग्राह्य 127।
न दुर्बलः । तोयं पिबति वक्त्रेण श्वा सो जायते न न्यथा । बहून्यवामहस्तेन यन्तोयं पिबते द्विजः । स्व

पानेनतत्तुल्यंमनुराहप्रजापतिः।हस्तीप्रसाध्यगोद्वेषयः।पिबेद्विषहराणः।सदेवाश्चपितृस्यैवक्त्रा
त्मानंस्वैवघातयेत्।भुंजेन्नभिन्नपात्रेऽत्रग्राह्यात्।यद्यपात्रेधारणपूर्वकंभोजनमाचरेत्तदा।दधिक्षीरघृतेषु
त्काग्रभक्ष्यैर्वीजनैस्तथा।तस्मात्पक्वैःधान्यचूर्णैःकरौरम्यौशोधयेत्।भुक्त्वावामघटोदकेनविधि
नानस्तमाहितः।शोधयेन्मुखहस्तौस्वमन्त्रोक्तैर्विधिनैरपि।बौधायनः।नातिसुहितोऽमृतापिधान
मसीत्युपरिष्टादपःपीत्वाचमेत्।पुनरप्यमृतदक्षिणपादांगुष्ठेपाणिंनिःस्रावयेत्।अंगुष्ठमात्रःपुरु
षोंऽगुष्ठेचसमाश्रितः।ईशःसर्वस्यजगतःप्रभुःप्रीणातिविश्वभुक्।[illegible]।ब्रह्मपुराणे।स्त्रीमासि
वाकूजानूस्वगोप्रदानफलंलभेत्।भुक्त्वाचैवसमुत्तिष्ठेत्नव्याप्याद्रेणपाणिना।आपरितोष्यस्विस्
वघावत्यात्रमन्नदृष्टी।उधृतेप्यस्वविस्तावघावक्रो[illegible]नमसी।स्कंदः।भुक्त्वासमुखमास्थायतदन्नं
परिणामयेत्।इतिहस्तमघर्षणायेऽप्तसद्मक्रोनयेत्।अष्टमेलेकापात्रास्ववहिंर्ध्याघुनस्ततः
प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत्।यामद्वयंशयानस्तुब्रह्मभूयायकल्पते॥ ॥अथशय्या
विष्णुपुराणे नविधिः।कृतपादादिशौचस्तुभुक्त्वासायंततोगृही।गच्छेच्छय्यामस्फुटितामपिदारुमयींनृपनावि

शालांतवाप्रश्नीनासमीमध्विनंनियनन्यदीमयीशय्यामधितिष्ठेन्नात्तो।प्राच्यांदिशिशिरःश
स्तंयाम्यायामथवानृप।सदैवस्वपतःपुंसोविपरीतंतुरोगदं।इतिविष्णुपुराणे।नमेनंदीश्वरःप्रतिग्राहक
यःस्वपतोनरः।तस्यकृष्णाऽप्रत्यक्षांनभविष्यतिविभयी।नाश्मपीठोपधानेन।नचिविशीर्णस्वद्वापु
नान्यवर्णोपिसेविता।धर्मेनन्मुक्तस्नेनन्मतयरुयुहायत।नेसुनश्मशानवल्मीकमरुसटदेवद्वायासुनपर्वाण
नराभस्पोत्स्नावेवा।मरात्तूकोष्टयवत्राद्वि।पर्वत्रप्रतिपत्स्थविदुपोषसेघि।नतैलाभ्यक्तशिराः।ननग्नः।
18 नाधिष्ठितःकृष्णवर्मणिसुप्यात्।नार्द्रपाणिः।ननग्नोनानुवंशेनाकाशेनपाताशेशयने नपर्वप
रुक्षोनभिन्नेनगजभग्नेकृतेनविक्षुदग्धेकृतेनास्निग्धेनघटसिक्तमुमज्जान्व लमध्येननावि
नगोष्टेनधान्यगोगृहरुद्रानाशमनसाणाम्बुपरिनोच्छिष्टोनदिवाम्बुष्पननसंध्यायांनभस्मनिदृष्टो
नचाद्वस्योनार्द्रेनपर्वतमस्तके।अनुवंशेगिरहमर्द्वन्यकाष्ठदेर्ध्यानुगतो।अथदाराकामेञ्चापर्वा
वः।सदानिशायांदारान्प्रत्यजेतुव्रत।इतिविष्णुपुराणे।स्नानस्त्रगन्धधूपादीनानाधमात्यःसाधिते ११५
थवा।सकामस्यानुरागस्यव्यवायंपुरुषोव्रजेत।ऋतुकालाभिगमनेस्वकाधिक्यार्थंमधुरंदृष्यमि

श्री शारिकायै नमः ॥ अथ कुशकण्डिका ॥ तत्र क्रमः ॥ कुशैर्हस्तपरिमितां चतुरस्रां भूमिं परि-
समुह्य तानैशान्यां निःक्षिप्य ॥ गोमयोदकेन उपलिप्य ॥ स्रुवमूलेन स्फ्येन वा प्रादेशमात्रमुत्त-
रोत्तरक्रमेण त्रिरुल्लिख्य ॥ उल्लेखनक्रमेण अनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य ॥ तत्र कांस्य-
पात्रेण शुद्धं वह्निमानीय स्वाभिमुखं निधाय ॥ अग्नेर्दक्षिणतः ब्रह्मासनं दत्वा ॥ तदुपरि प्रागग्रा-
न् कुशान् आस्तीर्य ॥ पुष्पचंदनताम्बूलवस्त्राण्यादाय ॥ अद्य कर्तव्यामुककर्महोमकर्मणि कृता-
20 कृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूलव-
स्त्रैर्ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोऽस्मीति प्रतिवचनं ॥ यथाविहितं कर्म कुर्विति ॥ [illegible] कर-
वाणीति प्रतिवचनं ॥ ततो ब्राह्मणमग्नेः [illegible] दक्षिणेनानीय अस्मिन् होमकर्मणि त्वं मे ब्र-
ह्मा भवेत्यभिधाय पूर्वकल्पितासने उपवेशयेत् ॥ भवानीति प्रतिब्रूयात् ॥ यदि ब्राह्मणाभावो
स्तदा ॥ अद्यास्मिन्नमुकहोमकर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय पूर्वकल्पितासने कुशमुपवेशयेत्
ततः प्रणीतापात्रं पुरतः कृत्वा [illegible] ब्रह्मणो मुखमवलोक्य अग्नेरुत्तर-

श्राद्धेनिमंत्रितःश्राद्धेभुक्त्वा।कृत्वाप्यव्यवायंनस्कृपति।

ध्यंभक्षयेत्।पत्न्यियंलघ्वाहारंकारयेत्।याज्ञवल्क्यः।षोडशर्तुनिशाःस्त्रीणां।तत्रमनुः।तासामाद्या
श्चतस्रस्तुनिंदितैकादशीचया।त्रयोदशीचशेषास्युःप्रशस्तादशरात्रयः।युग्मासुपुत्राजायंतेस्त्रियोयुग्मा
सुततःस्त्रियः।ऋतुगमोत्तरंस्नानं।अन्यथालेपप्रक्षालनाचमनस्पर्शनंनस्नायमनमीगप्रोक्तएवंवाक्षी
वासोभिन्नंकुर्यात्।[illegible]।नास्नातांतुस्त्रियंगच्छेन्नातुरांनरजस्वलां।नानिष्टांनाप्रकुपितां
नाप्रशस्तांनगर्भिणीं।नादक्षिणांनान्यकामांनाकामांनान्ययोषितं।क्षुत्क्षामामतिभुक्तांवास्व
१९ यंचैभिर्गुणैर्युतः।देवद्विजगुरूणांवावाप्यीनाश्रमेभवेत्।चैत्यचत्वरतीर्थेषुनचैवचचतुःपथे
नचैवश्मशानोपवनेसलिलेषुमहीपते।प्रोक्तपर्वस्वशेषेषुनैवभूपालसंध्ययोः।गच्छेद्व्यवायंम
तिमान्मूत्रोच्चारप्रपीडितः।चतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा।पर्वाण्येतानिराजेन्द्ररवि
संक्रांतिरेवच।सुधीस्त्रयोषानसमाचरेत्।तथाष्टवर्षास्तुयोषित्परिवर्जनीया।योषिन्मघाकृत्तिक
योत्तरासु।मूलेच।नाप्राप्तयौवनांगच्छेत्।नवयोधिकामुपेयात्।नगर्भिणींदीर्घजिजीविषुः।श्रीम १९।
एकाम्रेश्वरपादपद्मपरागपूतामलमानसेन।गंगाधरेणस्वहितायक्लृप्तासत्पद्धतिःसाऽस्तुहितानी।

तः कृत्वोपरि निदध्यात्। ततः परिस्तरणं। बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणो
ऽग्निपर्यन्तं। नैरृत्याद्वायव्यान्तं। अग्नितः प्रणीतापर्यन्तं। ततोऽग्नेरुत्तरतः पश्चिमदिशि। पवित्रछे
दनार्थं कुशत्रयं। पवित्रकरणार्थं साग्रानन्तर्गर्भकुशपत्रद्वयं। प्रोक्षणीपात्रं। आज्यस्थाली
संमार्जनकुशाः उपयमनार्थं वेणीभूतकुशत्रयं। समिधस्तिस्रः। स्रुवः। आज्यं। यवाः पूर्ण
पात्रं एतत्सर्वं पवित्रछेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयं ब्रमषामुत्तरोत्तरतो
साधारणवस्तून्युपकल्पनीयानि। तत्रोक्तानां कुशापत्रद्वयं गृहीत्वा पवित्रछेदनकुशैः स्वप्राद

91

११

धर्म

पद्धति:

आचारादर्श